
# सप्तमः अभ्यासः

# अव्ययानि



**अधोलिखितं संवादं ध्यानेन पठत –**

(प्रातः उपवनं गत्वा बालाः परस्परम् आलपन्ति।)

| | | |
|---|---|---|
| रमेशः | – | एतत् उपवनम्। उपवनं परितः वृक्षाः शोभन्ते। |
| तरुणः | – | पश्य, अत्र बालकाः पादकन्दुकेन क्रीडन्ति। |
| मेधावी | – | आम्, तत्र एका कन्या अपि सखीभिः सह क्रीडति। |
| कर्णः | – | अत्र केचन जनाः तु शनैः-शनैः भ्रमन्ति केचित् च शीघ्रं-शीघ्रं चलन्ति। |
| भास्करः | – | पश्य, एकतः मालाकारः खनित्रेण भूमिं खनति बीजं च वपति। |
| मोहनः | – | सर्वत्र केदारेषु अनेकवर्णानि पुष्पाणि विकसन्ति। |
| मनीषा | – | पुष्पैः सह कण्टकानि अपि भवन्ति तथापि तानि सदा प्रसन्नचित्तानि एव। |
| रमेशः | – | वयम् अपि पुष्पाणि इव सदा प्रसन्नाः भवेम। |

1. **उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानि चित्वा मञ्जूषायां लिखत –**

**मञ्जूषा**

| | | | |
|---|---|---|---|
| .......................... | .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... | .......................... |
| .......................... | .......................... | .......................... | .......................... |

एतानि पदानि अव्ययानि सन्ति।

**अव्ययं नाम किम्?**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।**

**अर्थात्**

तत् पदम् अव्ययं कथ्यते, यस्मिन् पदे लिङ्ग-विभक्ति-वचन-कारणात् परिवर्तनं न भवति। यत् पदं सदा एकेन एव रूपेण तिष्ठति, तत् अव्ययम्।

यथा- अत्र, तत्र, कुत्र, कदा, अधुना, परितः इत्यादयः।

2. **मञ्जूषातः उचित-अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत –**

वने (i) .......................... पशुमहोत्सवः अस्ति। मञ्चस्य (ii) .......................... सिंहः विराजते। आकाशे (iii) .......................... मेघाः सन्ति। मेघान् दृष्ट्वा मयूराः वृक्षाणाम् (iv) .......................... नृत्यन्ति। पशवः (v) .......................... भ्रमन्ति। सर्पः कोटरात् (vi) .......................... आगच्छति। सर्पात् भीताः पशवः कोलाहलं कुर्वन्ति। कोलाहलं श्रुत्वा सिंहः (vii) .......................... गर्जति आदिशति च – भोः! कोलाहलं (viii) .......................... कुरुत। शृणुत – अस्माकं जीवनं वृक्षान् (ix) .......................... असम्भवम्। वृक्षाः फलानि छायां (x) .......................... दत्त्वा अस्मान् उपकुर्वन्ति। (xi) .......................... अस्माभिः वने (xii) .......................... वृक्षाः रक्षणीयाः।


**मञ्जूषा**

नूनम्, उच्चैः, अद्य, बहिः, मा, उपरि, अधः,
अतः, विना, इतस्ततः, च, सर्वत्र।

♦ अधः कोष्ठकस्थेषु अव्ययपदेषु कानिचित् पदानि कालबोधकानि, कानिचित् स्थानबोधकानि, कानिचित् प्रश्नबोधकानि प्रकीर्णानि च सन्ति।

| कालबोधकानि | स्थानबोधकानि | प्रश्नबोधकानि | प्रकीर्णानि |
|---|---|---|---|
| पुरा, यदा, तदा,<br>अधुना, ह्यः<br>श्वः,<br>अद्य, परश्वः<br>परह्यः | अत्र, यत्र,<br>तत्र, अन्यत्र<br>सर्वत्र,<br>एकत्र<br>उभयतः | कदा, कुतः,<br>कुत्र, किमर्थम्<br>कथम्, कति,<br>किम् | इति, इव, चित्,<br>चन, मा, यत्,<br>यावत्-तावत्<br>यथा-तथा, सहसा<br>वृथा, कदापि |

## कालबोधकानि




♦ उपरि कालचक्रे स्थितानि अव्ययपदानि अधोलिखितस्य संवादस्य सहायतया अवगच्छत -

अध्यापिका – नमिते! किं त्वं जानासि कालिदासस्य कालम्?

नमिता – महाकविः कालिदासः **पुरा** अभवत्, परं तस्य निश्चितकालं **न** जाने।

अध्यापिका – राधे! किं त्वया तेन लिखितम् अभिज्ञानशाकुन्तलं नाटकं दृष्टम्?

राधा – आम्! महोदये! अहं तत् नाटकं द्रष्टुं **ह्यः** रवीन्द्ररङ्गशालाम् अगच्छम्।

अध्यापिका – नमिते! त्वम् इदं नाटकं द्रष्टुं **कदा** गमिष्यसि?

नमिता – अहं तु एतत् द्रष्टुं **श्वः** गमिष्यामि।

अध्यापिका – लतिके! किं त्वं नाटकं द्रष्टुं न इच्छसि?

लतिका – इच्छामि। **यदा** मम माता अनुमतिं दास्यति **तदा** अहं द्रक्ष्यामि।

3. स्थूलाक्षराणि अव्ययपदानि अधः लिखत -

.................. .................. .................. .................. .................. ..................

**4. (क) मञ्जूषायां दत्तान् शब्दान् संयोज्य कानिचित् वाक्यानि रचयत –**

| | | | |
|---|---|---|---|
| | ह्यः | उपवने | अगच्छम् |
| | श्वः | देवालयम् | भ्रमामि |
| अहम् | अधुना | भोजनम् | तरिष्यामि |
| | यदा-कदा | तरणताले | करोमि |
| | अपि | विद्यालयम् | गच्छामि |

(i) ................................................................................

(ii) ................................................................................

(iii) ................................................................................

(iv) ................................................................................

(v) ................................................................................

**(ख) 'ह्यः – श्वः' इति प्रयोगेण शृङ्खलां पूरयत –**

**यथा** – (i) ह्यः रविवासरः आसीत् **श्वः सोमवासरः भविष्यति।**

(ii) ...................... बुधवासरः आसीत् श्वः गुरुवासरः भविष्यति।

(iii) ...................... शुक्रवासरः आसीत् ...................... शनिवासरः भविष्यति।

(iv) ...................... सोमवासरः आसीत् ...................... मङ्गलवासरः भविष्यति।

**ध्यातव्यम्** –

**केषाञ्चित् अव्ययानां प्रयोगः युग्मरूपेण अपि भवति।**

(i) यत्र-तत्र
(ii) यदा-तदा
(iii) यावत्-तावत्
(iv) यदि-तर्हि
(v) अत्र-तत्र
(vi) चेत्-नो चेत्
(vii) यथा-तथा

**5. (क) उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयत –**



यत्र पुस्तकालयः तत्र पाठकाः।



............ कृष्णमेघाः ............ वृष्टिः।




............ आम्रवृक्षः ............ कोकिलः।



............ पुष्पाणि ............ भ्रमरा: ।

............ देवालय: ............ भक्ता: ।



**( ख ) उदाहरणम् अनुसृत्य अव्ययपदै: संवादं पूरयत –**

**अध्यापक:** – भास्कर: कोकिल: कदा कूजति ?

**भास्कर:** – यदा वसन्तागमनं भवति तदा कोकिल: कूजति।

**अध्यापक:** – शोभनम्! कृषका: कदा नन्दन्ति ?

**भास्कर:** – ...................... सुवृष्टि: भवति ...................... कृषका: नन्दन्ति।

**अध्यापक:** – साधु! तम: कदा नश्यति ?

**भास्कर:** – ...................... भानु: उदयति, ...................... तम: नश्यति।

**अध्यापक:** – अतिशोभनम्! मयूरा: कदा नृत्यन्ति ?

**भास्कर:** – ...................... मेघा: गर्जन्ति ...................... मयूरा: नृत्यन्ति।

**अध्यापक:** – सुष्ठु! मेघा: कदा अपसरन्ति ?

**भास्कर:** – ...................... वात: चलति ...................... मेघा: अपसरन्ति।

**( ग ) उदाहरणम् अनुसृत्य 'यावत्-तावत्' इति युग्मस्य रिक्तस्थानेषु उचितं प्रयोगं कुरुत –**

**यथा** – (i) **यावत्** दीयते **तावत्** धनस्य सदुपयोग: भवति।

(ii) ...................... परोपकार: क्रियते ...................... शरीरस्य सदुपयोग: ।

(iii) ...................... स्थास्यन्ति गिरय: ...................... रामायणी कथा प्रचरिष्यति।

(iv) ...................... एव मार्जार: प्रविशति ...................... सर्वे मूषका: पलायिता: ।

**यातायातस्य चिह्नै: 'मा' अव्ययस्य अवबोधनम् –**



मा तिष्ठ



ध्वनिं मा कुरु



मा गच्छ



दक्षिणं प्रति
मा गच्छ



वामं प्रति
मा गच्छ

6. **उदाहरणम् अनुसृत्य वाक्यपरिवर्तनं कुरुत –**

| | |
|---|---|
| **यथा – रामः असत्यं न वदेत्।** | **असत्यं मा वद।** |
| बालकः पथि न क्रीडेत्। | पथि ..................... क्रीड। |
| छात्राः कक्षायाम् उच्चैः न वदेयुः। | छात्राः! कक्षायाम् उच्चैः ..................... वदत। |
| रवीन्द्रः दीर्घसूत्री न भवेत्। | रवीन्द्र! दीर्घसूत्री ..................... भव। |
| सः कदापि पर्युषितम् अन्नं न खादेत्। | पर्युषितम् अन्नं ..................... खाद। |

7. **अधुना 'इव' अव्ययस्य प्रयोगेण अधोलिखितपदानां समुचितमेलनं क्रियताम्—**

| | | | | | |
|---|---|---|---|---|---|
| नरः | चन्द्रः | **यथा –** | नरः | व्याघ्रः | इव |
| करः | कमलम् | | ..................... | ..................... | ..................... |
| मुखम् | पल्लवः | | ..................... | ..................... | ..................... |
| चरणम् | व्याघ्रः | | ..................... | ..................... | ..................... |

8. **''इति'' अव्ययस्य प्रयोगः।**

**उदाहरणम् –** तैत्तिरीयोपनिषद् आदिशति – 'सत्यं वद, धर्मं चर' इति। एवमेव 'इति' अव्ययस्य प्रयोगं कृत्वा अस्यां मञ्जूषायां प्रदत्तान् वाक्यांशान् ग्रन्थैः सह योजयत।

(1) सत्यमेव जयते
(3) ईशावास्यमिदं सर्वम्
(2) कर्मण्येवाधिकारस्ते
(4) वाग्भूषणं भूषणम्
(2) भगवद्गीता
(3) ईशावास्योपनिषत्
(4) नीतिशतकम्
(1) मुण्डकोपनिषद्

(i) ..........................................................................................

(ii) ..........................................................................................

(iii) ..........................................................................................

(iv) ..........................................................................................

9. **अधोलिखितेषु हास्यालापेषु अव्ययपदानि रेखाङ्कितानि कृत्वा अधः लिखत।**

**(i)** **याचकः** – श्रेष्ठिन्! एकं पणं देहि।
**श्रेष्ठी** – अत्र कोऽपि मानवः न अस्ति।
**याचकः** – कृपया त्वम् एव अस्मिन् समये मानवः भव।

(ii) अनिलः – राजेश! नूनम् आवां मित्रे स्वः। जानासि किं मित्रस्य लक्षणम्?

राजेशः – सम्यक् जानामि।

अनिलः – तर्हि मदर्थं त्वं किं किं कर्तुं समर्थोऽसि?

राजेशः – अहं त्वदर्थं मृत्युनापि योद्धुं सज्जोऽस्मि।

(सहसा व्याघ्रः दृष्टिपथे समायाति)

अनिलः – रे वीर! रक्ष माम्, एष व्याघ्रः मां खादति।

राजेशः – अरे! मया मृत्युना योद्धुं कथितं न तु व्याघ्रेण।

अव्ययानि– .............. .............. .............. .............. .............. ..............

.............. .............. .............. .............. .............. ..............

.............. .............. .............. .............. .............. ..............

## 10. अव्ययपदानि रेखाङ्कितानि कुरुत –

(i) अलसस्य कुतः विद्या अविद्यस्य कुतः धनम्।
अधनस्य कुतः मित्रम् अमित्रस्य कुतः सुखम्॥

(ii) शनैः कन्था शनैः पन्थाः शनैः पर्वतलङ्घनम्।
शनैः विद्या शनैः वित्तम् पञ्चैतानि शनैः शनैः॥

(iii) त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव देव॥

(iv) वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम्।
वृथा दानं समर्थस्य वृथा दीपो दिवाऽपि च॥

(v) यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद् रामायणी कथा लोकेषु प्रचरिष्यति॥

## 11. उचिताव्ययपदैः रिक्तस्थानानि पूरयत –

कुत्र, तर्हि, कथम्, च, अत्र।

(i) शतयोजनपर्यन्तं शैलानां पारं .................... द्रष्टुं समर्थः भव इति।

(ii) अहं यदि तव सन्ततिं न पालयामि .................... कुत्र स्युः पिकाः?

(iii) हा! दग्धा मे घोटकाः .................... रक्षणीयाः?

(iv) स पापकर्मा .................... गतः? इति न जानीमः।

(v) भो, भो बालकाः! कथम् .................... नतोन्नते मार्गे क्रीडथ?

## मिश्रितप्रश्नाः

**1. अधोलिखितपङ्क्तिषु अव्ययपदानि रेखाङ्कितानि कुरुत –**

(क) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।

(ख) न चन्दनरसः न शीतला छाया च पुरुषं प्रह्लादयति।

(ग) अथ एकदा भगवान् बोधिसत्त्वः शिवीनां राजा जातः।

(घ) सः बाल्यात् एव शास्त्रपारङ्गतः आसीत्।

(ङ) तत्र अर्थिनां समूहः अभीष्टवस्तूनि प्राप्नोत्।

**2. मञ्जूषापदसहायतया उचिताव्ययपदैः रिक्तस्थानानि पूरयत –**

अपि, एव, यदि, इव, नूनम्।

(क) ...................... भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि।

(ख) ...................... ईदृशं दानम् इच्छन् अयं केनापि प्रेरितः स्यात्।

(ग) सः याचकः ...................... तत् नेत्रं यथास्थानम् अस्थापयत्।

(घ) राजा नीलोत्पलम् ...................... एकं चक्षुः प्रीत्या अयच्छत्।

(ङ) अलम् एतावता दुस्साहसेन प्रभूतं धनम् ...................... दीयताम्।

**3. मञ्जूषायाः उचिताव्ययानि चित्वा रिक्तस्थानपूर्तिं कुरुत –**

वृथा, तर्हि, शनैः, च, इति।

(क) राजा एकं चक्षुः ...................... अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्।

(ख) शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव ...................... उक्त्वा शक्रः अन्तर्हितः अभवत्।

(ग) अस्य याच्ञा ...................... मा अस्तु इति राजा अमात्यान् अकथयत्।

(घ) सरस्तीरे राजहंसः हंसी ...................... विहरतः।

(ङ) यदि अहं कृष्णवर्णः ...................... श्रीरामस्य वर्णः कीदृशः ?

**4. मञ्जूषापदसहायतया रिक्तस्थानानि पूरयत –**

इव, अधुना, तु, तदा, अपि।

(क) बकः अविचलं ध्यानमग्नः 'स्थितप्रज्ञः' ...................... तिष्ठति।

(ख) मयूरस्य केकारवं श्रुत्वा कोकिलः ...................... लज्जते।

(ग) यदा कोकिलः पञ्चमस्वरेण गायति ...................... श्रोतारः मन्त्रमुग्धा इव भवन्ति।

(घ) ...................... रमणीया हि सृष्टिरेषा जगत्पतेः।

(ङ) एतत् कार्यं ...................... कुक्कुटोऽपि करोति।

5. **अव्ययपदानि अधोलिखितवाक्येषु रेखाङ्कितानि कुरुत –**

(क) जिह्वालोलुपः मेषः महानसं प्रविश्य यत् पश्यति तद् भक्षयति।

(ख) अहं तु वनं गच्छामि।

(ग) अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।

(घ) ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्।

(ङ) तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।

6. **मञ्जूषातः उचिताव्ययपदानि चित्वा रिक्तस्थानानि पूरयत –**

एकदा, इव, च, यदि, यावत्।

(क) पुत्रशोकसन्तप्ताः युधिष्ठिरः, भीमः द्रौपदी ...................... रणभूमौ प्रविशन्ति।

(ख) अग्निः ...................... दहति मामयं शोकः।

(ग) ...................... असौ क्रूरकर्मा न दण्ड्यते तावत् अहम् इतः न गमिष्यामि।

(घ) ...................... ब्रह्मास्त्रं प्रयुज्यते तर्हि सर्वा पृथ्वी दग्धा स्यात्।

(ङ) सः ...................... द्वारकापुरीम् आगच्छत्।

7. **मञ्जूषापदसहायतया रिक्तस्थानानि पूरयत –**

इव, सम्प्रति, उच्चैः, मा, यदि।

(क) प्रिये द्रौपदि! एवं ...................... ब्रूयाः।

(ख) युधिष्ठिरः '...................... आश्वस्तः अस्मि' इत्यवदत्।

(ग) ...................... कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्।

(घ) गुरूपदेशेन ...................... अनेन बालवचसा मम चक्षुषी समुन्मीलिते।

(ङ) प्रच्छन्नभाग्यः ...................... अक्रन्दत्।

8. **अधोलिखितवाक्येषु अव्ययपदानि रेखाङ्कितानि कुरुत –**

(क) इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।

(ख) सखे यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।

(ग) प्रच्छन्नभाग्यः श्रमेण शनैः शनैः प्रभूतं धनम् अर्जितवान्।

(घ) अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

(ङ) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

(च) न कुर्यादहितं कर्म स परेभ्यः कदापि च।

9. **मञ्जूषायाः उचिताव्ययपदानि चित्वा रिक्तस्थानानि पूरयत –**

अद्य, यत्, अधुना, एव, इति।

(क) अरुणाचलप्रदेशस्य एकस्मिन् विद्यालये ...................... उत्सवस्य वातावरणम्।

(ख) तदा ...................... छात्राणाम् एकः दलः तत्र प्रविशति।

(ग) प्रसीदामि ...................... भवन्तः अस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः।

(घ) 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' ...................... अस्ति।

(ङ) ...................... तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुकाः स्मः।

**10. अधोलिखितवाक्येषु अव्ययपदानि रेखाङ्कितानि कुरुत –**

(क) प्राचीनतमा हि एषा गणना।

(ख) एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते।

(ग) अये! कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम्?

(घ) सूर्यस्य द्वे गती उत्तरायणं दक्षिणायनञ्च।

(ङ) षड्ऋतवः एव मे नाभयः।